राम अष्टोत्तरशतनाम स्तोत्रम्

rāma aṣṭottaraśatanāma stotram

Link in Description

श्रीरामो रामभद्रश्च रामचन्द्रश्च शाश्वतः ।
राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः ॥ १ ॥

śrīrāmō rāmabhadraśca rāmacandraśca śāśvataḥ |
rājīvalōcanaḥ śrīmān rājēndrō raghupuṅgavaḥ || 1 ||

Check Link in Description

जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः ।
विश्वामित्रप्रियो दान्तः शरणत्राणतत्परः ॥ २ ॥

jānakīvallabhō jaitrō jitāmitrō janārdanaḥ |
viśvāmitrapriyō dāntaḥ śaraṇatrāṇatatparaḥ || 2 ||

Check Link in Description

वालिप्रमथनो वाग्मी सत्यवाक्सत्यविक्रमः ।
सत्यव्रतो व्रतधरः सदाहनुमदाश्रितः ॥ ३ ॥

vālipramathanō vāgmī satyavāksatyavikramaḥ |
satyavratō vratadharaḥ sadāhanumadāśritaḥ || 3 ||

Check Link in Description

कौसलेयः खरध्वंसी विराधवधपण्डितः ।
विभीषणपरित्राता हरकोदण्डखण्डनः ॥ ४ ॥

kausalēyaḥ kharadhvaṁsī virādhavadhapaṇḍitaḥ |
vibhīṣaṇaparitrātā harakōdaṇḍakhaṇḍanaḥ || 4 ||

Check Link in Description

सप्ततालप्रभेत्ता च दशग्रीवशिरोहरः ।
जामदग्न्यमहादर्पदलनस्ताटकान्तकः ॥ ५ ॥

saptatālaprabhēttā ca daśagrīvaśirōharaḥ |
jāmadagnyamahādarpadalanastāṭakāntakaḥ || 5 ||

Check Link in Description

वेदान्तसारो वेदात्मा भवरोगस्यभेषजम् ।
दूषणत्रिशिरोहन्ता त्रिमूर्तिस्त्रिगुणात्मकः ॥ ६ ॥

vēdāntasārō vēdātmā bhavarōgasyabhēṣajam |
dūṣaṇatriśirōhantā trimūrtistriguṇātmakaḥ || 6 ||

Check Link in Description

त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्तनः ।
त्रिलोकरक्षको धन्वी दण्डकारण्यकर्तनः ॥ ७ ॥

trivikramastrilōkātmā puṇyacāritrakīrtanaḥ |
trilōkarakṣakō dhanvī daṇḍakāraṇyakartanaḥ || 7 ||

Check Link in Description

अहल्याशापशमनः पितृभक्तो वरप्रदः ।
जितेन्द्रियो जितक्रोधो जितामित्रो जगद्गुरुः ॥ ८ ॥

ahalyāśāpaśamanaḥ pitṛbhaktō varapradaḥ |
jitēndriyō jitakrōdhō jitāmitrō jagadguruḥ || 8 ||

Check Link in Description

ऋक्षवानरसङ्घाती चित्रकूटसमाश्रयः ।
जयन्तत्राणवरदः सुमित्रापुत्रसेवितः ॥ ९ ॥

ṛkṣavānarasaṅghātī citrakūṭasamāśrayaḥ |
jayantatrāṇavaradaḥ sumitrāputrasēvitaḥ || 9 ||

Check Link in Description

सर्वदेवाधिदेवश्च मृतवानरजीवनः ।
मायामारीचहन्ता च महादेवो महाभुजः ॥ १० ॥

sarvadēvādhidēvaśca mr̥tavānarajīvanaḥ |
māyāmārīcahantā ca mahādēvō mahābhujaḥ || 10 ||

Check Link in Description

सर्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः ।
महायोगी महोदारः सुग्रीवेप्सितराज्यदः ॥ ११ ॥

sarvadēvastutaḥ saumyō brahmaṇyō munisaṁstutaḥ |
mahāyōgī mahōdāraḥ sugrīvēpsitarājyadaḥ || 11 ||

Check Link in Description

सर्वपुण्याधिकफलः स्मृतसर्वाघनाशनः ।
आदिपुरुषः परमपुरुषो महापुरुष एव च ॥ १२ ॥

sarvapuṇyādhikaphalaḥ smr̥tasarvāghanāśanaḥ |
ādipuruṣaḥ paramapuruṣō mahāpuruṣa ēva ca || 12 ||

Check Link in Description

पुण्योदयो दयासारः पुराणपुरुषोत्तमः ।
स्मितवक्त्रो मितभाषी पूर्वभाषी च राघवः ॥ १३ ॥

puṇyōdayō dayāsāraḥ purāṇapuruṣōttamaḥ |
smitavaktrō mitabhāṣī pūrvabhāṣī ca rāghavaḥ || 13 ||

Check Link in Description

अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तमः ।
मायामानुषचारित्रो महादेवादिपूजितः ॥ १४ ॥

anantaguṇagambhīrō dhīrōdāttaguṇōttamaḥ |
māyāmānuṣacāritrō mahādēvādipūjitaḥ || 14 ||

Check Link in Description

सेतुकृज्जितवाराशिः सर्वतीर्थमयो हरिः ।
श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्धरः ॥ १५ ॥

sētukṛjjitavārāśiḥ sarvatīrthamayō hariḥ |
śyāmāṅgaḥ sundaraḥ śūraḥ pītavāsā dhanurdharaḥ || 15 ||

Check Link in Description

सर्वयज्ञाधिपो यज्वा जरामरणवर्जितः ।
विभीषणप्रतिष्ठाता सर्वावगुणवर्जितः ॥ १६ ॥

sarvayajñādhipō yajvā jarāmaraṇavarjitaḥ |
vibhīṣaṇapratiṣṭhātā sarvāvaguṇavarjitaḥ || 16 ||

Check Link in Description

परमात्मा परम्ब्रह्म सच्चिदानन्दविग्रहः ।
परञ्ज्योतिः परन्धाम पराकाशः परात्परः ।
परेशः पारगः पारः सर्वदेवात्मकः परः ॥ १७ ॥

paramātmā parambrahma saccidānandavigrahaḥ |
parañjyōtiḥ parandhāma parākāśaḥ parātparaḥ |
parēśaḥ pāragaḥ pāraḥ sarvadēvātmakaḥ paraḥ || 17 ||

Check Link in Description

श्रीरामाष्टोत्तरशतं भवतापनिवारकम् ।
सम्पत्करं त्रिसन्ध्यासु पठतां भक्तिपूर्वकम् ॥
रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

śrīrāmāṣṭōttaraśataṁ bhavatāpanivārakam |
sampatkaraṁ trisandhyāsu paṭhatāṁ bhaktipūrvakam ||
rāmāya rāmabhadrāya rāmacandrāya vēdhasē |
raghunāthāya nāthāya sītāyāḥ patayē namaḥ ||

Check Link in Description